श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीनिवासरामानुजमहादेशिकैः (मैसूर आण्डवन्)
संस्कृतभाषायां अनुवाद्य अनुगृहीतं
श्रीमद्वेदान्ताचार्यविरचितम्

॥ प्रबन्धसारम् ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ प्रबन्धसारम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

आम्नायानां चतुर्णां मुनय इह समस्तार्थसारं सदोदं
सर्वेप्युज्जीवितास्सन्त्विति पदयुगलं प्राप्य नारायणस्य।
व्याजह्रुर्द्राविडोक्त्या चतुरनुगसहस्रं च पद्यानि यानि
तेषां सङ्ख्याविभागाकलनपटुमते ! भो महात्मन् कवीन्द्र !॥ **1.1** ॥

पूर्णज्ञानाधिवासे ह्युपचितयशसि प्रोदितस्तूप्पुलाख्ये
संशुद्धस्सत्कुमारस्त्विति भुवि विनुतस्त्वं गुरो ! वेङ्कटेश !।
मर्त्यास्सन्त्वत्र हृष्टा इति भवदुदितं सत्प्रबन्धादिसारं
चित्तं चोज्जीवितं यन्मननत इह मे देहि तादृक् दयस्व॥ **1.2** ॥

वेदाध्यापनतुष्टवाजिशिरसः प्रीत्या च कारुण्यतः
तूप्पुल्सम्भव ! वादिनो विजितवन् ! हृष्ट ! स्थिरायां दृढम्।
सिद्धान्तं त्वभिवर्धयन् यतिपतेस्तस्यैव संस्थापक !
श्रीमान् ! वेङ्कटनाथ ! देशिकमणे ! वेदैकपद्याश्रय॥ **2.1** ॥

सम्यक् सर्वान् स्वभावान् मुनिकुलमहितांश्चानुभूयाथ तद्वत्
सन्तश्चोज्जीवितास्सन्त्विति सहजपरप्रीतिमूर्ते ! सुकीर्ते !।
वेदान्ताचार्यनामन् ! भवदुपरचितं सत्प्रबन्धादिसारं
चित्तं चोज्जीवितं यन्मननत इह मे देहि तादृक् दयस्व॥ **2.2** ॥

यस्मिन्नृक्षे पुरे मास्यजनिषत मुनीन्द्राश्च तत्तत्क्रमाख्याः
तत्तद्दिव्यप्रबन्धा विभजनगणनाभ्यां सहाहत्यसङ्ख्याः।
तत्तत्सारार्थजातं निखिलमवगतास्सर्व उज्जीवितास्स्युः
भायुश्चेत्यार्यपादौ विशदमभिहितुं सेवते मानसं मे॥ **1** ॥

सारार्थाकरवेदवाग्विलसनक्षोणीजनोज्जीवने
कर्तुं मासि तुलाभिधे श्रवणभे काञ्च्यां सरस्यम्बुजे।
कारुण्यातिशयो यथा धुततनुः प्रादुर्भवन् ! पूत ! भोः !
श्रीदेवालयपत्तने शिशिरिते योगिन् ! सरस्सम्भव !॥ **2.1** ॥

रात्रौ कस्यचिदालयस्य पुरतोऽलिन्दं भवत्यास्थिते
द्वाभ्यां मप्य उपागते भगवति “ज्योतिः परं स्यादि’ ति।
य “द्वैय्यन्दकळी” ति पद्यशतकं गीतं समृद्धं वसु
त्वं मे चेतसि तन्निबोध सुखदं वेद्यं च कारुण्यतः॥ **2.2** ॥

श्रीमान् ! अम्बुधिमल्लपाल ! सुमुने ! भूताख्य ! नाथ ! क्षितौ
तौले मासि धनिष्ठभे धृतजने ! श्रीकोवलूर् सत्पुरे।
एकत्र प्रघणे भवत्स्वपि यथाऽन्योऽन्यं न विद्यत्तथा
श्रीशे सत्यनपायसन्मतिमहाज्योतिः प्रदीपोत्सवम्॥ **3.1** ॥

द्वितीयं शतकं गीतं “अन्बेदकळिये” ति हि।
प्रद्योतेत यथा चित्ते मदीयेऽनुगृहाण भोः॥ **3.2** ॥

तौले मासे मयूरे पुर उदित ! जलाधीशतारे महाख्य !
त्वय्यन्याभ्यां मुनिभ्यां सह लसति “तिरुक्कोवलूर्” वास्त्वलिन्दे।
ज्योतिष्युद्योतमाने जगति परिवृताज्ञाननिर्मूलनार्थं
साक्षात् कुर्वन् श्रियस्त्वं प्रियमिह सुमुने ! मोदमानो महात्मन् !॥ **4.1** ॥

श्रियं व्यलोकयं हीति देव ! ते परम ! स्रजम्।
द्राविडोक्तिशतीं नित्यनतायानुगृहाण मे॥ **4.2** ॥

पौषे मासे मखोडुन्युदित ! मुनिमणे ! भक्तिसार ! प्रधीमन्
नानासिद्धान्तसारप्रमथनत इहात्यद्भुतानन्त शक्तिः।
"श्रीमानेवाखिलेशो न" पर इति समुद्घुष्टवन् ! वेदचूडा -
सारार्थं नान्मुह न्नित्यतिमधुरगिरारब्धदिव्यप्रबन्धम्॥ **5.1** ॥

पद्यानां षण्णवत्या सकलगुणयुजा सन्निबद्धं तथान्यं
ख्यातं गीतं च विंशत्यधिकशतयुतं तं "तिरुच्चन्द" वृत्ते।
नित्यं सत्यैकबद्धं जगति च समुदीर्यावितस्स्यां यथाहं
सामोदं त्वं प्रसीदन् प्रवितर विनतायानुगृह्णीष्व मे भोः॥ **5.2** ॥

वैशाखे कुरुकापुरे ह्युदितवन् ! योगिन् ! विशाखोडुनि
त्वद्गीतं शतपद्यकं "तिरुविरुत्तं" नाम चादौ क्रमात्।
प्रोक्तं "त्वाशिरियं" च सप्तकमितं सारार्थपूर्णं ततः
सप्ताशीतिमितं "विशालतिरुवन्दादीति" नाम्नोदितम्॥ **6.1** ॥

अन्ते त्वं "तिरुवाय्मोळी" ति सुवचं माधुर्यधुर्यं व्यधाः
साहस्र्या शतयुक्तया द्व्यधिकया संयोजितं सङ्ख्यया॥
निर्दुष्टं भगवद्गुणानुभवदं श्रीवैष्णवोज्जीवकं
यद्धन्नैव च विस्मराम्यनुगृहाणेमानि सर्वाणि मे॥ **6.2** ॥

चैत्रे चित्राढ्यकाले प्रविमलमतिमन् ! जात ! कोळूर् पुराग्र्ये
सम्यग्भक्त्याकृते ! श्रीशठमथनपदोपासनासक्त ! घोषन्।
नेतो जानेऽन्यदैवन्त्विति मधुरकवे ! त्वत्कृतं कण्णिनुण्णि -
त्यारब्धं ते प्रबन्धं वितर करुणया मेऽद्य सैकादशं त्वम्॥ **7** ॥

कुम्भे “वञ्चिक्कळा” ख्ये पुर उदित ! पुनर्वस्वहे शातकुम्भ -
प्रद्योतत्कुन्तपाणे ! निजकुलविनुतं रङ्गनाथं स्वदैवम्।
हैमं धामास्य रम्यं जगदनुभवनीयैकभाग्याधिवासं
तां चानन्दप्रदात्रीं प्रणतपरिषदं सन्दिदृक्षो ! महात्मन्॥ **8.1** ॥

योगिन् ! श्रीकुलशेखर ! प्रभुमणे धात्र्यां विमोहच्छिदं
उच्चैर्गीतममुं “तवेरुळिरिये” त्यारब्धपद्यात्मकम्।
पञ्चोपेतशतं च मे “तिरुमॊळि” त्याम्नात मत्यद्भुतं
कारुण्यात्समुपादिशाद्य भगवन् ! सम्यक् प्रसन्नो मयि॥ **8.2** ॥

ख्याते “श्रीविल्लिपुत्तूर्” अभिधपुरवरे ज्येष्ठमासे महर्क्षे
स्वात्याख्ये विष्णुचित्त ! प्रभव ! वरमुने ! त्वं पुरा सद्गुणस्य।
चित्ते पाण्ड्यस्य निस्संशयमिह परतत्त्वं श्रियो वल्लभं हि
निर्धार्य स्थापयित्वा परमधिमधुरं वारणेन्द्राधिरूढे॥ **9.1** ॥

त्वय्यायाते क्रमेणोत्सवकृतविभवे वीथिकासु प्रमोदात्
अभ्रे च भ्राजमाने श्रितमुनिपमहं वीक्षितुं लोकनाथे।
निध्यायन् गीतवांस्त्वं गरुडभुजवहं ताश्च “पल्लाण्ड्” मुखोक्तीः
कारुण्येन त्रिसप्तत्यधिकशतचतुष्कोन्मिता मे प्रयच्छ॥ **9.2** ॥

आषाढे पूर्वफल्गुन्यतिशयसुभगा त्वत्समुत्पत्तियोगा
जोते ! श्रीविष्णुचित्तात् अतिशुचि ! विनुते ! रङ्गनाथाय क्लृप्ताम्।
मालां धृत्वात्ममौळावथ निजरमणायार्पयन्तीह गोदे !
प्रीत्या गीतास्त्वया यास्सकलफलजुषः ताश्च षड्द्व्यङ्गगाधाः॥ **10.1** ॥

गुणिता दशभिश्चतुर्दशापि
त्र्यधिका “स्तैय्यॊरुतिङ्गळा” द्युपात्ताः।
अधुनानुगृहाण मे प्रसन्ना
प्रथितास्त्वं सरसाश्च रम्यगाधाः॥ **10.2** ॥

क्षेत्रे "मण्डङ्गुडी" ति स्थिरतरसुमहासौधभासे शरासे
मासे ज्येष्ठोडुजात ! प्रणुतगुणनिधे ! देव भक्ताङ्घ्रिरेणो !।
पूर्वं श्रीरङ्गराजेऽनिशमिह तुलसीदामसेवां वितन्वन्
व्यातानीर्याश्च भक्त्या ननु नवगुणिताः पञ्चसङ्ख्यास्सुगाधाः॥ **11.1** ॥

द्राविड्यां "तिरुमालै" इत्यभिहिताः अत्युत्तमास्तास्तथा
सङ्गीता दश गाधिकास्सुललिताः प्राबोधिकास्सत्फलाः।
श्रीरङ्गाधिपतेः पदाब्जविषये यास्ताश्च सर्वा अपि
त्वत्पादप्रणताय मेऽनवरतं प्रीत्याऽनुगृह्णीष्व भोः॥ **11.2** ॥

कीर्त्यात्पूरितकार्तिके हि भगवन् ! पाणान् ! जगत् वेत्त्विति
रोहिण्यां "उरैयूर्" पुरेऽतिमहिते सञ्जात रङ्गेशितुः।
मित्वा भूमिमवस्थितस्य रुचिरस्याग्रे मुनीन्द्रोद्वह
प्राणौस्त्वं श्रुतिमौलिसारमहितैः पादादिमूर्धावधि॥ **12.1** ॥

प्रतनैर्द्राविडैः पद्यैः दशभिस्तान्यहं यथा।
न विस्मरेयं तद्बद्धि संप्रीत्यानुगृहाण मे॥ **12.2** ॥

स्वामिन् ! "श्रीकुरयल्" पुरेऽतिरुचिरे भोः कार्तिके कृत्तिका -
जात ! श्रीकलिवैरिसंयमिमणे ! प्रज्ञाप्रदात्रीं कृतिम्।
"श्रीसूक्तिं महतीम्" अशीत्यधिकसाहस्र्या चतुर्भिर्युतं
पञ्चावृत्तचतुर्युतामसदृशीं "श्रीमत्कुरुन्दाण्डहम्"॥ **13.1** ॥

त्रिंशत्पद्ययुतां प्रबन्धमहितां "श्रीमन्नॆडुन्दाण्डहं"
ह्येकां "श्रीयॆळुक्कूत्तिरुक्कै" इति तां "लघ्वीं मडल्नामिकाम्"।
चत्वारिंशदधिष्ठितां च "महतीं गुण्यां मडल्संज्ञिकां"
सप्तावृत्तदशाधिकाष्टकमितां ताश्चानुगृह्णीष्व मे॥ **13.2** ॥

श्रीमद्भूताभिधाने सकलजगदभिष्टूयमाने पुरेऽग्र्ये
चैत्रे चार्द्रापवित्रेऽहनि सुकृतिजने ! सर्वदुर्वादिजैत्र !।
रङ्गैकोपायजीविन् ! सदयहृदय ! भो योगिराट् ! लक्ष्मणार्य !
श्रीमद्रङ्गामृतेन क्षितिसुरपतिना त्वत्पदाम्भोजयुग्मे ॥ **14.1** ॥

अन्तादिरूपेण सुवर्णिता याः "कलित्तुरै" वृत्तविचित्रितास्ताः।
अष्टोत्तरा अत्र शतेन युक्ता गाधाः कृपातोऽनुगृहाण मे त्वम् ॥ **14.2** ॥

सङ्ख्यातुं संप्रवृत्ते त्रिशतक मुदितं योगिभिश्चादिमैस्तैः
ज्योतिष्मद्भक्तिसाराभिधमुनिकृतया षोडशेतद्विशत्या।
सत्यैकार्थप्रकाशाश्शठमथनमुनेः षण्णवत्या द्विशत्या
साहस्र्येतास्सुगाधा मधुरकविमुनेरेवमेकादशापि ॥ **15.1** ॥

गाधाश्श्रीकुलशेखरार्यरचिताः शत्या च पञ्चेतया
सप्तत्या त्रियुजा चतुश्शतमिताश्श्रीविष्णुचित्तोदिताः ॥
गेयास्ता वसुधापरा च जननी गोदा हि तस्या गिरः
सप्तत्या शतयुक्तया त्रियुतया गम्भीरभावोत्तराः ॥ **15.2** ॥

पञ्चाशद्युक्तपञ्च प्रणतपदरजोयोगिगीता दशापि
श्रीपाणस्याथ तातोन्नतवृषशिखरिश्रीनिवासाङ्घ्रिनिष्ठाः।
साहस्र्याक्तद्विशत्या कलिमथनमुनेः तास्त्रिपञ्चाशतेताः
दातुर्मुक्तेर्यतीन्दोः प्रतिपदकमले बन्धुरे कीर्तितास्ताः ॥ **16.1** ॥

श्रीमद्रङ्गामृतस्याप्यतिशयगुरुभक्त्याकृतेस्साष्टशत्या
सर्वास्वाशासु सर्वा अवनतजनतोज्जीवनायैव क्लृप्ताः ॥
एवं गीता मुनीन्द्रैः सुमहितचतुरावृत्तसाहस्रगाधाः
आहत्यास्माकमेता मुनिपदरसिकानां समुज्जीविका हि ॥ **16.2** ॥

कासारो भूतयोगी महदथ शठजित् कीर्तिमान् भक्तिसारः
सत्यैकालम्बकीर्तिर्मधुरकविरसौ वंशमौलिर्मुनिश्च।
श्रीगोदा विष्णुचित्तः प्रणतपदरजाः पाणनाथो दयाळुः
स्वामी श्रीकल्यरातिः यतिपतिपदसेवी च मान्या जगत्याम्॥ **17.1** ॥

षड्भिश्च द्विगुणीकृता मुनिवरा एकश्च तेषां च ये
ग्रन्था विंशतियुक्चतुर्मितियुतास्तत्रत्यगाधामितिः।
साहस्री च चतुर्गुणा समुदिता सर्वोचितानन्ददा
सैवोज्जीवनहेतुरत्र भगवत्संसेविनां नस्सदा॥ **17.2** ॥

अन्तातीतचतुर्विधागमनिगूढार्थान् मुनीन्द्रा यथा
सङ्गृह्य न्यगदंश्च सुद्रविडवाग्रीतीश्च सङ्ख्याश्च ताः।
सर्वोज्जीवकृते हि सुद्रविडवाक्प्राज्ञो यथावस्थितं
तूपुल्वेदशिरोगुरुस्समलिखत् सारं प्रबन्धादिकम्॥ **18.1** ॥

स्वान्ते चिन्तयतां नित्यं श्रीमन्नारायणस्य हि।
करुणातिशयेनेह सर्वं क्षेमङ्करं भवेत्॥ **18.2** ॥

श्रीमते निगमान्तमहादेशिकाय नमः

प्रबन्धसारं श्रुतिमौलिसूरेः
व्याख्याञ्च कर्णाटकभाषया तथा।
श्लोकीचकार स्वगुरोः प्रसादात्
गोपालसूरिस्सुमनोरसाय॥

॥ इति प्रबन्धसारं समाप्तम्॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥